# parAsharagItA

# પરાશરગીતા

## Document Information

Text title : parAasharagItA

File name : parAsharagiitaa.itx

Category : gItA, giitaa

Location : doc_giitaa

Transliterated by : Professor Tokunaga in Kyoto system(?)

Proofread by : Sunder Hattangadi

Latest update : June 2, 1998

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# પરાશરગીતા

અધ્યાય ૨૭૯

યુ

અતઃ પરં મહાબાહો યચ્છ્રેયસ્તદ્વદસ્વ મે ।
ન તૃપ્યામ્યમૃતસ્યેવ વસસસ્તે પિતામહ ॥ ૧॥

કિં કર્મ પુરુષઃ કૃત્વા શુભં પુરુષસત્તમ ।
શ્રેયઃ પરમવાપ્નોતિ પ્રેત્ય ચેહ ચ તદ્વદ ॥ ૨॥

ભીષ્મોવાચ

અત્ર તે વર્તયિષ્યામિ યથાપૂર્વં મહાયશઃ ।
પરાશરં મહાત્માનં પપ્રચ્છ જનકો નૃપઃ ॥ ૩॥

કિં શ્રેયઃ સર્વભૂતાનામસ્મિઁલ્લોકે પરત્ર ચ ।
યદ્ભવેત્પ્રતિપત્તવ્યં તદ્ભવાન્પ્રબ્રવીતુ મે ॥ ૪॥

તતઃ સ તપસા યુક્તઃ સર્વધર્માવિધાનવિત્ ।
નૃપાયાનુગ્રહ મના મુનિર્વાક્યમથાબ્રવીત્ ॥ ૫॥

ધર્મ એવ કૃતઃ શ્રેયાનિહ લોકે પરત્ર ચ ।
તસ્માદ્ધિ પરમં નાસ્તિ યથા પ્રાહુર્મનીષિણઃ ॥ ૬॥

પ્રતિપદ્ય નરો ધર્મં સ્વર્ગલોકે મહીયતે ।
ધર્માત્મકઃ કર્મ વિધિર્દેહિનાં નૃપસત્તમ ।
તસ્મિન્નાશ્રમિણઃ સન્તઃ સ્વકર્માણીહ કુર્વતે ॥ ૭॥

ચતુર્વિધા હિ લોકસ્ય યાત્રા તાત વિધીયતે ।
મર્ત્યા યત્રાવતિષ્ઠન્તે સા ચ કામાત્પ્રવર્તતે ॥ ૮॥

સુકૃતાસુકૃતં કર્મ નિષેવ્ય વિવિધૈઃ ક્રમૈઃ ।
દશાર્ધ પ્રવિભક્તાનાં ભૂતાનાં બહુધા ગતિઃ ॥ ૯॥

સૌવર્ણં રાજતં વાપિ યથા ભાન્દં નિષિચ્યતે ।
તથા નિષિચ્યતે જન્તુઃ પૂર્વકર્મ વશાનુગઃ ॥ ૧૦॥

નાબીજાજ્જાયતે કિં ચિન્નાકૃત્વા સુખમેધતે ।
સુકૃતી વિન્દતિ સુખં પ્રાપ્ય દેહક્ષયં નરઃ ॥ ૧૧॥

દૈવં તાત ન પશ્યામિ નાસ્તિ દૈવસ્ય સાધનમ્ ।
સ્વભાવતો હિ સંસિધ્ધા દેવગન્ધર્વદાનવાઃ ॥ ૧૨॥

પ્રેત્ય જાતિકૃતં કર્મ ન સ્મરન્તિ સદા જનાઃ ।
તે વૈ તસ્ય ફલપ્રાપ્તૌ કર્મ ચાપિ ચતુર્વિધમ્ ॥ ૧૩॥

લોકયાત્રાશ્રયશ્ચૈવ શબ્દો વેદાશ્રયઃ કૃતઃ ।
શાન્ત્યર્થં મનસસ્તાત નૈતદ્વૃધ્ધાનુશાસનમ્ ॥ ૧૪॥

ચક્ષુષા મનસા વાચા કર્મણા ચ ચતુર્વિધમ્ ।
કુરુતે યાદૃશં કર્મ તાદૃશં પ્રતિપદ્યતે ॥ ૧૫॥

નિરન્તરં ચ મિશ્રં ચ ફલતે કર્મ પાર્થિવ ।
કલ્યાનં યદિ વા પાપં ન તુ નાશોઽસ્ય વિદ્યતે ॥ ૧૬॥

કદા ચિત્સુકૃતં તાત કૂતસ્થમિવ તિષ્ઠતિ ।
મજ્જમાનસ્ય સંસારે યાવદ્દુઃખાદ્વિમુચ્યતે ॥ ૧૭॥

તતો દુઃખક્ષયં કૃત્વા સુકૃતં કર્મ સેવતે ।
સુકૃતક્ષયાદ્દુષ્કૃતં ચ તદ્વિધ્ધિ મનુજાધિપ ॥ ૧૮॥

દમઃ ક્ષમા ધૃતિસ્તેજઃ સન્તોષઃ સત્યવાદિતા ।
હ્રીરહિંસાવ્યસનિતા દાક્ષ્યં ચેતિ સુખાવહાઃ ॥ ૧૯॥

દુષ્કૃતે સુકૃતે વાપિ ન જન્તુરયતો ભવેત્ ।
નિત્યં મનઃ સમાધાને પ્રયતેત વિચક્ષણઃ ॥ ૨૦॥

નાયં પરસ્ય સુકૃતં દુષ્કૃતં વાપિ સેવતે ।
કરોતિ યાદૃશં કર્મ તાદૃશં પ્રતિપદ્યતે ॥ ૨૧॥

સુખદુઃખે સમાધાય પુમાનન્યેન ગચ્છતિ ।
અન્યેનૈવ જનઃ સર્વઃ સઙ્ગતો યશ્ચ પાર્થિવ ॥ ૨૨॥

પરેષાં યદસૂયેત ન તત્કુર્યાત્સ્વયં નરઃ ।
યો હ્યસૂયુસ્તથાયુક્તઃ સોઽવહાસં નિયચ્છતિ ॥ ૨૩॥

ભીરૂ રાજન્યો બ્રાહ્મણઃ સર્વભક્ષો
વૈશ્યોઽનીહાવાન્હીનવર્ણોઽલસશ્ ચ ।
વિદ્વાંશ્ચાશીલો વૃત્તહીનઃ કુલીનઃ
સત્યાદ્ભ્રષ્ટો બ્રાહ્મણઃ સ્ત્રી ચ દુષ્ટા ॥ ૨૪॥

રાગી મુક્તઃ પચમાનોઽઽત્મહેતોર્
મૂર્ખો વક્તા નૃપ હીનં ચ રાસ્ત્રમ્ ।
એતે સર્વે શોચ્યતાં યાન્તિ રાજન્
યશ્ચાયુક્તઃ સ્નેહહીનઃ પ્રજાસુ ॥ ૨૫॥

---

અધ્યાય ૨૮૦
પરાશરોવાચ
મનોરથરથં પ્રાપ્ય ઇન્દ્રિયાર્થ હયં નરઃ ।
રશ્મિભિર્જ્ઞાનસમ્ભૂતૈર્યો ગચ્છતિ સ બુદ્ધિમાન્ ॥ ૧॥

સેવાશ્રિતેન મનસા વૃત્તિ હીનસ્ય શસ્યતે ।
દ્વિજાતિહસ્તાન્નિર્વૃત્તા ન તુ તુલ્યાત્પરસ્પરમ્ ॥ ૨॥

આયુર્નસુલભં લબ્ધ્વા નાવકર્ષેદ્વિશાં પતે ।
ઉત્કર્ષાર્થં પ્રયતતે નરઃ પુણ્યેન કર્મણા ॥ ૩॥

વર્ણેભ્યોઽપિ પરિભ્રષ્ટઃ સ વૈ સંમાનમર્હતિ ।
ન તુ યઃ સત્ક્રિયાં પ્રાપ્ય રાજસં કર્મ સેવતે ॥ ૪॥

વર્ણોત્કર્ષમવાપ્નોતિ નરઃ પુણ્યેન કર્મણા ।
દુર્લભં તમલબ્ધ્વા હિ હન્યાત્પાપેન કર્મણા ॥ ૫॥

અજ્ઞાનાદ્ધિ કૃતં પાપં તપસૈવાભિનિર્નુદેત્ ।
પાપં હિ કર્મફલતિ પાપમેવ સ્વયં કૃતમ્ ।
તસ્માત્પાપં ન સેવેત કર્મ દુઃખફલોદયમ્ ॥ ૬॥

પાપાનુબન્ધં યત્કર્મ યદ્યપિ સ્યાન્મહાફલમ્ ।
ન તત્સેવેત મેધાવી શુચિઃ કુસલિલં યથા ॥ ૭॥

કિં કસ્તમનુપશ્યામિ ફલં પાપસ્ય કર્મણઃ ।
પ્રત્યાપન્નસ્ય હિ સતો નાત્મા તાવદ્વિરોચતે ॥ ૮॥

પ્રત્યાપત્તિશ્ચ યસ્યેહ બાલિશસ્ય ન જાયતે ।
તસ્યાપિ સુમહાંસ્તાપઃ પ્રસ્થિતસ્યોપજાયતે ॥ ૯॥

વિરક્તં શોધ્યતે વસ્ત્રં ન તુ કૃષ્ણોપસંહિતમ્ ।
પ્રયત્નેન મનુષ્યેન્દ્ર પાપમેવં નિબોધ મે ॥ ૧૦॥

સ્વયં કૃત્વા તુ યઃ પાપં શુભમેવાનુતિષ્ઠતિ ।
પ્રાયશ્ચિત્તં નરઃ કર્તુમુભયં સોઽશ્નુતે પૃથક્ ॥ ૧૧॥

અજાનાત્તુ કૃતાં હિંસામહિંસા વ્યપકર્ષતિ ।
બ્રાહ્મણાઃ શાસ્ત્રનિર્દેશાદિત્યાહુર્બ્રહ્મવાદિનઃ ॥ ૧૨॥

કથા કામકૃતં ચાસ્ય વિહિંસૈવાપકર્ષતિ ।
ઇત્યાહુર્ધર્મશાસ્ત્રજ્ઞા બ્રાહ્મણા વેદપારગાઃ ॥ ૧૩॥

અહં તુ તાવત્પશ્યામિ કર્મ યદ્વર્તતે કૃતમ્ ।
ગુણયુક્તં પ્રકાશં ચ પાપેનાનુપસંહિતમ્ ॥ ૧૪॥

યથા સૂક્ષ્માણિ કર્માણિ ફલન્તીહ યથાતથમ્ ।
બુદ્ધિયુક્તાનિ તાનીહ કૃતાનિ મનસા સહ ॥ ૧૫॥

ભવત્યલ્પફલં કર્મ સેવિતં નિત્યમુલ્બનમ્ ।
અબુદ્ધિપૂર્વં ધર્મજ્ઞ કૃતમુગ્રેણ કર્મણા ॥ ૧૬॥

કૃતાનિ યાનિ કર્માણિ દૈવતૈર્મુનિભિસ્તથા ।
નાચરેત્તાનિ ધર્માત્મા શ્રુત્વા ચાપિ ન કુત્સયેત્ ॥ ૧૭॥

સઞ્ચિન્ત્ય મનસા રાજન્વિદિત્વા શક્તિમાત્મનઃ ।
કરોતિ યઃ શુભં કર્મ સ વૈ ભદ્રાણિ પશ્યતિ ॥ ૧૮॥

નવે કપાલે સલિલં સંન્યસ્તં હીયતે યથા ।
નવેતરે તથા ભાવં પ્રાપ્નોતિ સુખભાવિતમ્ ॥ ૧૯॥

સતોયેઽન્યત્તુ યત્તોયં તસ્મિન્નેવ પ્રસિચ્યતે ।
વૃદ્ધે વૃદ્ધિમવાપ્નોતિ સલિલે સલિલં યથા ॥ ૨૦॥

એવં કર્માણિ યાનીહ બુદ્ધિયુક્તાનિ ભૂપતે ।
નસમાનીહ હીનાનિ તાનિ પુણ્યતમાન્યપિ ॥ ૨૧॥

રાજ્ઞા જેતવ્યાઃ સાયુધાશ્ચોન્નતાશ્ ચ
સમ્યક્કર્તવ્યં પાલનં ચ પ્રજાનામ્ ।

અગ્નિશ્રેયો બહુભિશ્ચાપિ યજ્ઞૈર્
અન્તે મધ્યે વા વનમાશ્રિત્ય સ્થેયમ્ ॥ ૨૨॥

દમાન્વિતઃ પુરુષો ધર્મશીલો
ભૂતાનિ ચાત્માનમિવાનુપશ્યેત્ ।
ગરીયસઃ પૂજયેદાત્મશક્ત્યા
સત્યેન શીલેન સુખં નરેન્દ્ર ॥ ૨૩॥

---

અધ્યાય ૨૮૧
પરાશરોવાચ
કઃ કસ્ય ચોપકુરુતે કશ્ ચ કસ્મૈ પ્રયચ્છતિ ।
પ્રાની કરોત્યયં કર્મ સર્વમાત્માર્થમાત્મના ॥ ૧॥

ગૌરવેણ પરિત્યક્તં નિઃસ્નેહં પરિવર્જયેત્ ।
સોદર્યં ભ્રાતરમપિ કિમુતાન્યં પૃથગ્જનમ્ ॥ ૨॥

વિશિષ્ટસ્ય વિશિષ્ટાચ્ચ તુલ્યૌ દાનપ્રતિગ્રહૌ ।
તયોઃ પુણ્યતરં દાનં તદ્દ્વિજસ્ય પ્રયચ્છતઃ ॥ ૩॥

ન્યાયાગતં ધનં વર્ણૈર્ન્યાયેનૈવ વિવર્ધિતમ્ ।
સંરક્ષ્યં યત્નમાસ્થાય ધર્માર્થમિતિ નિશ્ચયઃ ॥ ૪॥

ન ધર્માર્થી નૃશંસેન કર્મણા ધનમર્જયેત્ ।
શક્તિતઃ સર્વકાર્યાણિ કુર્યાન્નર્દ્ધિમનુસ્મરેત્ ॥ ૫॥

અપો હિ પ્રયતઃ શીતાસ્તાપિતા જ્વલનેન વા ।
શક્તિતોઽતિથયે દત્ત્વા ક્ષુધાર્તાયાશ્નુતે ફલમ્ ॥ ૬॥

રન્તિદેવેન લોકેષ્ટા સિદ્ધિઃ પ્રાપ્તા મહાત્મના ।
ફલપત્રૈરથો મૂલૈર્મુનીનર્ચિતવાનસૌ ॥ ૭॥

તૈરેવ ફલપત્રૈશ્ચ સ માથરમતોષયત્ ।
તસ્માલ્લેભે પરં સ્થાનં શૈબ્યોઽપિ પૃથિવીપતિઃ ॥ ૮॥

દેવતાતિથિભૃત્યેભ્યઃ પિતૃભ્યોઽથાત્મનસ્તથા ।
ઋણવાઞ્જાયતે મર્ત્યસ્તસ્માદનૃણતાં વ્રજેત્ ॥ ૯॥

સ્વાધ્યાયેન મહર્ષિભ્યો દેવેભ્યો યજ્ઞકર્મણા ।

પિતૃભ્યઃ શ્રાદ્ધદાનેન નૃણામ્ અભ્યર્ચનેન ચ ॥ ૧૦॥

વાચઃ શેષાવહાર્યેણ પાલનેનાત્મનોઽપિ ચ ।
યથાવદ્ધૃત્ય વર્ગસ્ય ચિકીર્ષેદ્ધર્મમાદિતઃ ॥ ૧૧॥

પ્રયત્નેન ચ સંસિદ્ધા ધનૈરપિ વિવર્જિતાઃ ।
સમ્યગ્ઘુત્વા હુતવહં મુનયઃ સિદ્ધિમાગતાઃ ॥ ૧૨॥

વિશ્વામિત્રસ્ય પુત્રત્વમૃચીક તનયોઽગમત્ ।
ઋગ્ભિઃ સ્તુત્વા મહાભાગો દેવાન્વૈ યજ્ઞભાગિનઃ ॥ ૧૩॥

ગતઃ શુક્રત્વમુશના દેવદેવ પ્રસાદનાત્ ।
દેવીં સ્તુત્વા તુ ગગને મોદતે તેજસા વૃતઃ ॥ ૧૪॥

અસિતો દેવલશ્ચૈવ તથા નારદ પર્તવૌ ।
કક્ષીવાઞ્જામદગ્ન્યશ્ચ રામસ્તાન્ડ્યસ્તથાંશુમાન્ ॥ ૧૫॥

વસિષ્ઠો જમદગ્નિશ્ચ વિશ્વામિત્રોઽત્રિરેવ ચ ।
ભરદ્વાજો હરિશ્મશ્રુઃ કુન્દધારઃ શ્રુતશ્રવાઃ ॥ ૧૬॥

એતે મહર્ષયઃ સ્તુત્વા વિષ્ણુમૃગ્ભિઃ સમાહિતાઃ ।
લેભિરે તપસા સિદ્ધિં પ્રસાદાત્તસ્ય ધીમતઃ ॥ ૧૭॥

અનર્હાશ્ચાર્હતાં પ્રાપ્તાઃ સન્તઃ સ્તુત્વા તમેવ હ ।
ન તુ વૃદ્ધિમિહાન્વિચ્છેત્કર્મકૃત્વા જુગુપ્સિતમ્ ॥ ૧૮॥

યેઽર્થા ધર્મેણ તે સત્યા યેઽધર્મેણ ધિગસ્તુ તાન્ ।
ધર્મં વૈ શાશ્વતં લોકે ન જહ્યાદ્ધનકાઙ્ક્ષયા ॥ ૧૯॥

આહિતાગ્નિર્હિ ધર્માત્મા યઃ સ પુણ્યકૃદુત્તમઃ ।
વેદા હિ સર્વે રાજેન્દ્ર સ્થિતાસ્ત્રિષ્વગ્નિષુ પ્રભો ॥ ૨૦॥

સ ચાપ્યગ્ન્યાહિતો વિપ્રઃ ક્રિયા યસ્ય ન હીયતે ।
શ્રેયો હ્યનાહિતાગ્નિત્વમગ્નિહોત્રં ન નિષ્ક્રિયમ્ ॥ ૨૧॥

અગ્નિરાત્મા ચ માતા ચ પિતા જનયિતા તથા ।
ગુરુશ્ચ નરશાર્દૂલ પરિચર્યા યથાતથમ્ ॥ ૨૨॥

માનં ત્યક્ત્વા યો નરો વૃદ્ધસેવી
વિદ્વાન્ક્લીબઃ પશ્યતિ પ્રીતિયોગાત્ ।
દાક્ષ્યેણાહીનો ધર્મયુક્તો નદાન્તો

લોકેઽસ્મિન્વૈ પૂજ્યતે સદ્ભિરાર્યઃ ॥ ૨૩॥

અધ્યાય ૨૮૨

પરાશરોવાચ

વૃત્તિઃ સકાશાદ્વર્ણેભ્યસ્ત્રિભ્યો હીનસ્ય શોભના ।
પ્રીત્યોપનીતા નિર્દિષ્ટા ધર્મિષ્ઠાન્કુરુતે સદા ॥ ૧॥

વૃત્તિશ્ચેન્નાસ્તિ શૂદ્રસ્ય પિતૃપૈતામહી ધ્રુવા ।
ન વૃત્તિં પરતો માર્ગેચ્છુશ્રૂસાં તુ પ્રયોજયેત્ ॥ ૨॥

સદ્ભિસ્તુ સહ સંસર્ગઃ શોભતે ધર્મદર્શિભિઃ ।
નિત્યં સર્વાસ્વવસ્થાસુ નાસદ્ભિરિતિ મે મતિઃ ॥ ૩॥

યથોદય ગિરૌ દ્રવ્યં સંનિકર્ષેણ દીપ્યતે ।
તથા સત્સંનિકર્ષેણ હીનવર્ણોઽપિ દીપ્યતે ॥ ૪॥

યાદૃશેન હિ વર્ણેન ભાવ્યતે શુક્લમમ્બરમ્ ।
તાદૃશં કુરુતે રૂપમેતદેવમવૈહિ મે ॥ ૫॥

તસ્માદ્ગુણેષુ રજ્યેથા મા દોષેષુ કદા ચન ।
અનિત્યમિહ મર્ત્યાનાં જીવિતં હિ ચલાચલમ્ ॥ ૬॥

સુખે વા યદિ વા દુઃખે વર્તમાનો વિચક્ષણઃ ।
યશ્ચિનોતિ શુભાન્યેવ સ ભદ્રાણીહ પશ્યતિ ॥ ૭॥

ધર્માદપેતં યત્કર્મ યદ્યપિ સ્યાન્મહાફલમ્ ।
ન તત્સેવેત મેધાવી ન તદ્ધિતમિહોચ્યતે ॥ ૮॥

યો હૃત્વા ગોસહસ્રાણિ નૃપો દદ્યાદરક્ષિતા ।
સ શબ્દમાત્રફલભાગ્રાજા ભવતિ તસ્કરઃ ॥ ૯॥

સ્વયમ્ભૂરસૃજચ્ચાગ્રે ધાતારં લોકપૂજિતમ્ ।
ધાતાસૃજત્પુત્રમેકં પ્રજાનાં ધારણે રતમ્ ॥ ૧૦॥

તમર્ચયિત્વા વૈશ્યસ્તુ કુર્યાદત્યર્થમૃદ્ધિમત્ ।
રક્ષિતવ્યં તુ રાજન્યૈરુપયોજ્યં દ્વિજાતિભિઃ ॥ ૧૧॥

અજિહ્મૈરશઠ ક્રોધૈર્હવ્યકવ્ય પ્રયોક્તૃભિઃ ।
શૂદ્રૈર્નિર્માર્જનં કાર્યમેવં ધર્મો ન નશ્યતિ ॥ ૧૨॥

અપ્રનસ્તે તતો ધર્મે ભવન્તિ સુખિતાઃ પ્રજાઃ ।
સુખેન તાસાં રાજેન્દ્ર મોદન્તે દિવિ દેવતાઃ ॥ ૧૩॥

તસ્માદ્યો રક્ષતિ નૃપઃ સ ધર્મેણાભિપૂજ્યતે ।
અધીતે ચાપિ યો વિપ્રો વૈશ્યો યશ્ચાર્જને રતઃ ॥ ૧૪॥

યશ્ચ શુશ્રૂસતે શૂદ્રઃ સતતં નિયતેન્દ્રિયઃ ।
અતોઽન્યથા મનુષ્યેન્દ્ર સ્વધર્માત્પરિહીયતે ॥ ૧૫॥

પ્રાણ સન્તાપનિર્દિષ્ટાઃ કાકિન્યોઽપિ મહાફલાઃ ।
ન્યાયેનોપાર્જિતા દત્તાઃ કિમુતાન્યાઃ સહસ્રશઃ ॥ ૧૬॥

સત્કૃત્ય તુ દ્વિજાતિભ્યો યો દદાતિ નરાધિપ ।
યાદૃશં તાદૃશં નિત્યમશ્નાતિ ફલમૂર્જિતમ્ ॥ ૧૭॥

અભિગમ્ય દત્તં તુષ્ટ્યા યદ્ધન્યમાહુરભિષ્ટુતમ્ ।
યાચિતેન તુ યદ્દત્તં તદાહુર્મધ્યમં બુધાઃ ॥ ૧૮॥

અવજ્ઞયા દીયતે યત્તથૈવાશ્રદ્ધયાપિ ચ ।
તદાહુરધમં દાનં મુનયઃ સત્યવાદિનઃ ॥ ૧૯॥

અતિક્રમે મજ્જમાનો વિવિધેન નરઃ સદા ।
તથા પ્રયત્નં કુર્વીત યથા મુચ્યેત સંશયાત્ ॥ ૨૦॥

દમેન શોભતે વિપ્રઃ ક્ષત્રિયો વિજયેન તુ ।
ધનેન વૈશ્યઃ શૂદ્રસ્તુ નિત્યં દાક્ષ્યેણ શોભતે ॥ ૨૧॥

---

અધ્યાય ૨૮૩

પરાશરોવાચ

પ્રતિગ્રહાગતા વિપ્રે ક્ષત્રિયે શસ્ત્રનિર્જિતાઃ ।
વૈશ્યે ન્યાયાર્જિતાશ્ચૈવ શૂદ્રે શુશ્રૂસયાર્જિતાઃ ।
સ્વલાપ્યર્થાઃ પ્રશસ્યન્તે ધર્મસ્યાર્થે મહાફલાઃ ॥ ૧॥

નિત્યં ત્રયાણાં વર્ણાનાં શૂદ્રઃ શુશ્રૂસુરુચ્યતે ।
ક્ષત્રધર્મા વૈશ્ય ધર્મા નાવૃત્તિઃ પતતિ દ્વિજઃ ।
શૂદ્ર કર્મા યદા તુ સ્યાત્તદા પતતિ વૈ દ્વિજઃ ॥ ૨॥

વાનિજ્યં પાશુપાલ્યં ચ તથા શિલ્પોપજીવનમ્ ।

શૂદ્રસ્યાપિ વિધીયન્તે યદા વૃત્તિર્ન જાયતે ॥ ૩॥

રઙ્ગાવતરણં ચૈવ તથારૂપોપજીવનમ્ ।
મદ્ય માંસોપજીવ્યં ચ વિક્રયો લોહચર્મણોઃ ॥ ૪॥

અપૂર્વિણા ન કર્તવ્યં કર્મ લોકે વિગર્હિતમ્ ।
કૃતપૂર્વિણસ્તુ ત્યજતો મહાન્ધર્મ ઇતિ શ્રુતિઃ ॥ ૫॥

સંસિદ્ધિઃ પુરુષો લોકે યદાચરતિ પાપકમ્ ।
મદેનાભિપ્લુત મનાસ્તચ્ચ ન ગ્રાહ્યમુચ્યતે ॥ ૬॥

શ્રૂયન્તે હિ પુરાણે વૈ પ્રજા ધિગ્દન્દ શાસનાઃ ।
દાન્તા ધર્મપ્રધાનાશ્ચ ન્યાયધર્માનુવર્તકાઃ ॥ ૭॥

ધર્મ એવ સદા નૃણામિહ રાજન્પ્રશસ્યતે ।
ધર્મવૃદ્ધા ગુણાનેવ સેવન્તે હિ નરા ભુવિ ॥ ૮॥

તં ધર્મમસુરાસ્તાત નામૃષ્યન્ત જનાધિપ ।
વિવર્ધમાનાઃ ક્રમશસ્તત્ર તેઽન્વાવિશન્પ્રજાઃ ॥ ૯॥

તેષાં દર્પઃ સમભવત્પ્રજાનાં ધર્મનાશનઃ ।
દર્પાત્મનાં તતઃ ક્રોધઃ પુનસ્તેષામજાયત ॥ ૧૦॥

તતઃ ક્રોધાભિભૂતાનાં વૃત્તં લજ્જા સમન્વિતમ્ ।
હ્રીશ્ચૈવાપ્યનશદ્રાજંસ્તતો મોહો વ્યજાયત ॥ ૧૧॥

તતો મોહપરીતાસ્તે નાપશ્યન્ત યથા પુરા ।
પરસ્પરાવમર્દેન વર્તયન્તિ યથાસુખમ્ ॥ ૧૨॥

તાન્પ્રાપ્ય તુ સ ધિગ્દણ્ડો ન કારણમતોઽભવત્ ।
તતોઽભ્યગચ્છન્દેવાંશ્ચ બ્રાહ્મણાંશ્ચાવમન્ય હ ॥ ૧૩॥

એતસ્મિન્નેવ કાલે તુ દેવા દેવવરં શિવમ્ ।
અગચ્છઞ્શરણં વીરં બહુરૂપં ગણાધિપમ્ ॥ ૧૪॥

તેન સ્મ તે ગગનગાઃ સપુરાઃ પાતિતાઃ ક્ષિતૌ ।
તિસ્રોઽપ્યેકેન બાનેન દેવાપ્યાયિત તેજસા ॥ ૧૫॥

તેષામધિપતિસ્ત્વાસીદ્ભીમો ભીમપરાક્રમઃ ।
દેવતાનાં ભયકરઃ સ હતઃ શૂલપાણિના ॥ ૧૬॥

તસ્મિન્હતેઽથ સ્વં ભાવં પ્રત્યપદ્યન્ત માનવાઃ ।
પ્રાવર્તન્ત ચ વેદા વૈ શાસ્ત્રાણિ ચ યથા પુરા ॥ ૧૭॥

તતોઽભ્યસિઞ્ચન્રાજ્યેન દેવાનાં દિવિ વાસવમ્ ।
સપ્તર્ષયશ્ચાન્વયુઞ્જન્નરાણાં દન્દ ધારણે ॥ ૧૮॥

સપ્તર્ષીણામથોર્ધ્વં ચ વિપૃથુર્નામ પાર્થિવઃ ।
રાજાનઃ ક્ષત્રિયાશ્ચૈવ મન્દલેષુ પૃથક્પૃથક્ ॥ ૧૯॥

મહાકુલેષુ યે જાતા વૃત્તાઃ પૂર્વતરાશ્ ચ યે ।
તેષામથાસુરો ભાવો હૃદયાન્નાપસર્પતિ ॥ ૨૦॥

તસ્માત્તેનૈવ ભાવેન સાનુષઙ્ગેન પાર્થિવાઃ ।
આસુરાણ્યેવ કર્માણિ ન્યસેવન્ભીમવિક્રમાઃ ॥ ૨૧॥

પ્રત્યતિષ્ઠંશ્ચ તેષ્વેવ તાન્યેવ સ્થાપયન્તિ ચ ।
ભજન્તે તાનિ ચાદ્યાપિ યે બાલિશતમા નરાઃ ॥ ૨૨॥

તસ્માદહં બ્રવીમિ ત્વાં રાજન્સઞ્ચિન્ત્ય શાસ્ત્રતઃ ।
સંસિદ્ધાધિગમં કુર્યાત્કર્મ હિંસાત્મકં ત્યજેત્ ॥ ૨૩॥

ન સઙ્કરેણ દ્રવિણં વિચિન્વીત વિચક્ષણઃ ।
ધર્માર્થં ન્યાયમુત્સૃજ્ય ન તત્કલ્યાનમુચ્યતે ॥ ૨૪॥

સ ત્વમેવંવિધો દાન્તઃ ક્ષત્રિયઃ પ્રિયબાન્ધવઃ ।
પ્રજા ભૃત્યાંશ્ચ પુત્રાંશ્ચ સ્વધર્મેણાનુપાલય ॥ ૨૫॥

ઇષ્ટાનિષ્ટ સમાયોગો વૈરં સૌહાર્દમેવ ચ ।
અથ જાતિસહસ્રાણિ બહૂનિ પરિવર્તતે ॥ ૨૬॥

તસ્માદ્ગુણેષુ રજ્યેથા મા દોષેષુ કદા ચન ।
નિર્ગુણો યો હિ દુર્બુદ્ધિરાત્મનઃ સોઽરિરુચ્યતે ॥ ૨૭॥

માનુષેષુ મહારાજ ધર્માધર્મૌ પ્રવર્તતઃ ।
ન તથાન્યેષુ ભૂતેષુ મનુષ્યરહિતેષ્વિહ ॥ ૨૮॥

ધર્મશીલો નરો વિદ્વાનીહકોઽનીહકોઽપિ વા ।
આત્મભૂતઃ સદા લોકે ચરેદ્ભૂતાન્યહિંસયન્ ॥ ૨૯॥

યદા વ્યપેતહૃલ્લેખં મનો ભવતિ તસ્ય વૈ ।
નાનૃતં ચૈવ ભવતિ તદા કલ્યાનમૃચ્છતિ ॥ ૩૦॥

અધ્યાય ૨૮૪

પરાશરોવાચ

એષ ધર્મવિધિસ્તાત ગૃહસ્થસ્ય પ્રકીર્તિતઃ ।
તપસ્વિધિં તુ વક્ષ્યામિ તન્મે નિગદતઃ શ઼ૃણુ ॥ ૧॥

પ્રાયેન હિ ગૃહસ્થસ્ય મમત્વં નામ જાયતે ।
સઙ્ગાગતં નરશ્રેષ્ઠ ભાવૈસ્તામસરાજસૈઃ ॥ ૨॥

ગૃહાણ્યાશ્રિત્ય ગાવશ્ચ ક્ષેત્રાણિ ચ ધનાનિ ચ ।
દારાઃ પુત્રાશ્ચ ભૃત્યાશ્ચ ભવન્તીહ નરસ્ય વૈ ॥ ૩॥

એવં તસ્ય પ્રવૃત્તસ્ય નિત્યમેવાનુપશ્યતઃ ।
રાગદ્વેષૌ વિવર્ધેતે હ્યનિત્યત્વમપશ્યતઃ ॥ ૪॥

રાગદ્વેષાભિભૂતં ચ નરં દ્રવ્યવશાનુગમ્ ।
મોહજાતા રતિર્નામ સમુપૈતિ નરાધિપ ॥ ૫॥

કૃતાર્થો ભોગતો ભૂત્વા સ વૈ રતિપરાયનઃ ।
લાભં ગ્રામ્યસુખાદન્યં રતિતો નાનુપશ્યતિ ॥ ૬॥

તતો લોભાભિભૂતાત્મા સઙ્ગાદ્વર્ધયતે જનમ્ ।
પુષ્ટ્યર્થં ચૈવ તસ્યેહ જનસ્યાર્થં ચિકીર્ષતિ ॥ ૭॥

સ જાનન્નપિ ચાકાર્યમર્થાર્થં સેવતે નરઃ ।
બાલ સ્નેહપરીતાત્મા તત્ક્ષયાચ્ચાનુતપ્યતે ॥ ૮॥

તતો માનેન સમ્પન્નો રક્ષન્નાત્મપરાજયમ્ ।
કરોતિ યેન ભોગી સ્યામિતિ તસ્માદ્વિનશ્યતિ ॥ ૯॥

તપો હિ બુદ્ધિયુક્તાનાં શાશ્વતં બ્રહ્મ દર્શનમ્ ।
અન્વિચ્છતાં શુભં કર્મ નરાણાં ત્યજતાં સુખમ્ ॥ ૧૦॥

સ્નેહાયતન નાશાચ્ચ ધનનાશાચ્ચ પાર્થિવ ।
આધિવ્યાધિ પ્રતાપાચ્ચ નિર્વેદમુપગચ્છતિ ॥ ૧૧॥

નિર્વેદાદાત્મસમ્બોધઃ સમ્બોધાચ્છાસ્ત્ર દર્શનમ્ ।
શાસ્ત્રાર્થદર્શનાદ્રાજંસ્તપ એવાનુપશ્યતિ ॥ ૧૨॥

દુર્લભો હિ મનુષ્યેન્દ્ર નરઃ પ્રત્યવમર્શવાન્ ।
યો વૈ પ્રિય સુખે ક્ષીણે તપઃ કર્તું વ્યવસ્યતિ ॥ ૧૩॥

તપઃ સર્વગતં તાત હીનસ્યાપિ વિધીયતે ।
જિતેન્દ્રિયસ્ય દાન્તસ્ય સ્વર્ગમાર્ગપ્રદેશકમ્ ॥ ૧૪॥

પ્રજાપતિઃ પ્રજાઃ પૂર્વમસૃજત્તપસા વિભુઃ ।
ક્વ ચિત્ક્વ ચિદ્વ્રતપરો વ્રતાન્યાસ્થાય પાર્થિવ ॥ ૧૫॥

આદિત્યા વસવો રુદ્રાસ્તથૈવાગ્ન્યશ્વિમારુતાઃ ।
વિશ્વેદેવાસ્તથા સાધ્યાઃ પિતરોઽથ મરુદ્ગણાઃ ॥ ૧૬॥

યક્ષરાક્ષસ ગન્ધર્વાઃ સિદ્ધાશ્ચાન્યે દિવૌકસઃ ।
સંસિદ્ધાસ્તપસા તાત યે ચાન્યે સ્વર્ગવાસિનઃ ॥ ૧૭॥

યે ચાદૌ બ્રહ્મણા સૃષ્ટા બ્રાહ્મણાસ્તપસા પુરા ।
તે ભાવયન્તઃ પૃથિવીં વિચરન્તિ દિવં તથા ॥ ૧૮॥

મર્ત્યલોકે ચ રાજાનો યે ચાન્યે ગૃહમેધિનઃ ।
મહાકુલેષુ દૃશ્યન્તે તત્સર્વં તપસઃ ફલમ્ ॥ ૧૯॥

કૌશિકાનિ ચ વસ્ત્રાણિ શુભાન્યાભરણાનિ ચ ।
વાહનાસન યાનાનિ સર્વં તત્તપસઃ ફલમ્ ॥ ૨૦॥

મનોઽનુકૂલાઃ પ્રમદા રૂપવત્યઃ સહસ્રશઃ ।
વાસઃ પ્રાસાદપૃષ્ઠે ચ તત્સર્વં તપસઃ ફલમ્ ॥ ૨૧॥

શયનાનિ ચ મુખ્યાનિ ભોજ્યાનિ વિવિધાનિ ચ ।
અભિપ્રેતાનિ સર્વાણિ ભવન્તિ કૃતકર્મણામ્ ॥ ૨૨॥

નાપ્રાપ્યં તપસા કિં ચિત્ત્રૈલોક્યેઽસ્મિન્પરન્તપ ।
ઉપભોગ પરિત્યાગઃ ફલાન્યકૃતકર્મણામ્ ॥ ૨૩॥

સુખિતો દુઃખિતો વાપિ નરો લોભં પરિત્યજેત્ ।
અવેક્ષ્ય મનસા શાસ્ત્રં બુદ્ધ્યા ચ નૃપસત્તમ ॥ ૨૪॥

અસન્તોષોઽસુખાયૈવ લોભાદિન્દ્રિયવિભ્રમઃ ।
તતોઽસ્ય નશ્યતિ પ્રજ્ઞા વિદ્યેવાભ્યાસ વર્જિતા ॥ ૨૫॥

નષ્ટ પ્રજ્ઞો યદા ભવતિ તદા ન્યાયં ન પશ્યતિ ।
તસ્માત્સુખક્ષયે પ્રાપ્તે પુમાનુગ્રં તપશ્ ચરેત્ ॥ ૨૬॥

યદિષ્ટં તત્સુખં પ્રાહુર્દ્વેષ્યં દુઃખમિહોચ્યતે ।
કૃતાકૃતસ્ય તપસઃ ફલં પશ્યસ્વ યાદૃશમ્ ॥ ૨૭॥

નિત્યં ભદ્રાણિ પશ્યન્તિ વિષયાંશ્ચોપભુઞ્જતે ।
પ્રાકાશ્યં ચૈવ ગચ્છન્તિ કૃત્વા નિષ્કલ્મષં તપઃ ॥ ૨૮॥

અપ્રિયાણ્યવમાનાંશ્ચ દુઃખં બહુવિધાત્મકમ્ ।
ફલાર્થી તત્પથત્યક્તઃ પ્રાપ્નોતિ વિષયાત્મકમ્ ॥ ૨૯॥

ધર્મે તપસિ દાને ચ વિચિકિત્સાસ્ય જાયતે ।
સ કૃત્વા પાપકાન્યેવ નિરયં પ્રતિપદ્યતે ॥ ૩૦॥

સુખે તુ વર્તમાનો વૈ દુઃખે વાપિ નરોત્તમ ।
સ્વવૃત્તાદ્યો ન ચલતિ શાસ્ત્રચક્ષુઃ સ માનવઃ ॥ ૩૧॥

ઇષુપ્રપાત માત્રં હિ સ્પર્શયોગે રતિઃ સ્મૃતા ।
રસને દર્શને ઘ્રાણે શ્રવણે ચ વિશાં પતે ॥ ૩૨॥

તતોઽસ્ય જાયતે તીવ્રા વેદના તત્ક્ષયાત્પુનઃ ।
બુધા યેન પ્રશંસન્તિ મોક્ષં સુખમનુત્તમમ્ ॥ ૩૩॥

તતઃ ફલાર્થં ચરતિ ભવન્તિ જ્યાયસો ગુણાઃ ।
ધર્મવૃત્ત્યા ચ સતતં કામાર્થાભ્યાં ન હીયતે ॥ ૩૪॥

અપ્રયત્નાગતાઃ સેવ્યા ગૃહસ્થૈર્વિષયાઃ સદા ।
પ્રયત્નેનોપગમ્યશ્ચ સ્વધર્મ ઇતિ મે મતિઃ ॥ ૩૫॥

માનિનાં કુલજાતાનાં નિત્યં શાસ્ત્રાર્થચક્ષુષામ્ ।
ધર્મક્રિયા વિયુક્તાનામશક્ત્યા સંવૃતાત્મનામ્ ॥ ૩૬॥

ક્રિયમાણં યદા કર્મ નાશં ગચ્છતિ માનુષમ્ ।
તેષાં નાન્યદૃતે લોકે તપસઃ કર્મ વિદ્યતે ॥ ૩૭॥

સર્વાત્મના તુ કુર્વીત ગૃહસ્થઃ કર્મ નિશ્ચયમ્ ।
દાક્ષ્યેણ હવ્યકવ્યાર્થં સ્વધર્મં વિચરેન્નૃપ ॥ ૩૮॥

યથા નદીનદાઃ સર્વે સાગરે યાન્તિ સંસ્થિતમ્ ।
એવમાશ્રમિણઃ સર્વે ગૃહસ્થે યાન્તિ સંસ્થિતમ્ ॥ ૩૯॥

અધ્યાય ૨૮૫

જનક

વર્ણો વિશેષવર્ણાનાં મહર્ષે કેન જાયતે ।
એતદિચ્છામ્યહં શ્રોતું તદ્બ્રૂહિ વદતાં વર ॥ ૧॥

યદેતજ્જાયતેઽપત્યં સ એવાયમિતિ શ્રુતિઃ ।
કથં બ્રાહ્મણતો જાતો વિશેષગ્રહણં ગતઃ ॥ ૨॥

પરાશરોવાચ

એવમેતન્મહારાજ યેન જાતઃ સ એવ સઃ ।
તપસસ્ત્વપકર્ષેણ જાતિગ્રહણતાં ગતઃ ॥ ૩॥

સુક્ષેત્રાચ્ચ સુબીજાચ્ચ પુણ્યો ભવતિ સમ્ભવઃ ।
અતોઽન્યતરતો હીનાદવરો નામ જાયતે ॥ ૪॥

વક્ત્રાદ્ભુજાભ્યામૂરુભ્યાં પદ્ભ્યાં ચૈવાથ જજ્ઞિરે ।
સૃજતઃ પ્રજાપતેર્લોકાનિતિ ધર્મવિદો વિદુઃ ॥ ૫॥

મુખજા બ્રાહ્મણાસ્તાત બાહુજાઃ ક્ષત્રબન્ધવઃ ।
ઊરુજા ધનિનો રાજન્પાદજાઃ પરિચારકાઃ ॥ ૬॥

ચતુર્ણામેવ વર્ણાનામાગમઃ પુરુષર્ષભ ।
અતોઽન્યે ત્વતિરિક્તા યે તે વૈ સઙ્કરજાઃ સ્મૃતાઃ ॥ ૭॥

ક્ષત્રજાતિરથામ્બસ્થા ઉગ્રા વૈદેહકાસ્તથા ।
શ્વપાકાઃ પુલ્કસાઃ સ્તેના નિષાદાઃ સૂતમાગધાઃ ॥ ૮॥

આયોગાઃ કરણા વ્રાત્યાશ્ચન્દાલાશ્ચ નરાધિપ ।
એતે ચતુર્ભ્યો વર્ણેભ્યો જાયન્તે વૈ પરસ્પરમ્ ॥ ૯॥

જનક

બ્રહ્મણૈકેન જાતાનાં નાનાત્વં ગોત્રતઃ કથમ્ ।
બહૂનીહ હિ લોકે વૈ ગોત્રાણિ મુનિસત્તમ ॥ ૧૦॥

યત્ર તત્ર કથં જાતાઃ સ્વયોનિં મુનયો ગતાઃ ।
શૂદ્રયોનૌ સમુત્પન્ના વિયોનૌ ચ તથાપરે ॥ ૧૧॥

પરાશરોવાચ

રાજન્નૈતદ્ભવેદ્ગ્રાહ્યમપકૃષ્ટેન જન્મના ।

મહાત્માનં સમુત્પત્તિસ્તપસા ભાવિતાત્મનામ્ ॥ ૧૨॥

ઉત્પાદ્ય પુત્રાન્મુનયો નૃપતૌ યત્ર તત્ર હ ।
સ્વેનૈવ તપસા તેષામૃષિત્વં વિદધુઃ પુનઃ ॥ ૧૩॥

પિતામહશ્ચ મે પૂર્વમૃશ્યશૃઙ્ગશ્ચ કાશ્યપઃ ।
વતસ્તાન્ધ્યઃ કૃપશ્ચૈવ કક્ષીવાન્કમથાદયઃ ॥ ૧૪॥

યવક્રીતશ્ચ નૃપતે દ્રોણશ્ચ વદતાં વરઃ ।
આયુર્મતઙ્ગો દત્તશ્ ચ દ્રુપદો મત્સ્ય એવ ચ ॥ ૧૫॥

એતે સ્વાં પ્રકૃતિં પ્રાપ્તા વૈદેહ તપસોઽઽશ્રયાત્ ।
પ્રતિષ્ઠિતા વેદવિદો દમે તપસિ ચૈવ હિ ॥ ૧૬॥

મૂલગોત્રાણિ ચત્વારિ સમુત્પન્નાનિ પાર્થિવ ।
અઙ્ગિરાઃ કશ્યપશ્ચૈવ વસિષ્ઠો ભૃગુરેવ ચ ॥ ૧૭॥

કર્મતોઽન્યાનિ ગોત્રાણિ સમુત્પન્નાનિ પાર્થિવ ।
નામધેયાનિ તપસા તાનિ ચ ગ્રહણં સતામ્ ॥ ૧૮॥

જનક
વિશેષધર્માન્વર્ણાનાં પ્રબ્રૂહિ ભગવન્મમ ।
તથા સામાન્ય ધર્માંશ્ચ સર્વત્ર કુશલો હ્યસિ ॥ ૧૯॥

પરા
પ્રતિગ્રહો યાજનં ચ તથૈવાધ્યાપનં નૃપ ।
વિશેષધર્મો વિપ્રાણાં રક્ષા ક્ષત્રસ્ય શોભના ॥ ૨૦॥

કૃષિશ્ચ પાશુપાલ્યં ચ વાનિજ્યં ચ વિશામ્ અપિ ।
દ્વિજાનાં પરિચર્યા ચ શૂત્ર કર્મ નરાધિપ ॥ ૨૧॥

વિશેષધર્મા નૃપતે વર્ણાનાં પરિકીર્તિતાઃ ।
ધર્માન્સાધારણાંસ્તાત વિસ્તરેણ શૃણુષ્વ મે ॥ ૨૨॥

આનૃશંસ્યમહિંસા ચાપ્રમાદઃ સંવિભાગિતા ।
શ્રાદ્ધકર્માતિથેયં ચ સત્યમક્રોધ એવ ચ ॥ ૨૩॥

સ્વેષુ દારેષુ સન્તોષઃ શૌચં નિત્યાનસૂયતા ।
આત્મજ્ઞાનં તિતિક્ષા ચ ધર્માઃ સાધારણા નૃપ ॥ ૨૪॥

બ્રાહ્મણાઃ ક્ષત્રિયા વૈશ્યાસ્ત્રયો વર્ણા દ્વિજાતયઃ ।

અત્ર તેષામધીકારો ધર્મેષુ દ્વિપદાં વર ॥ ૨૫॥

વિકર્માવસ્થિતા વર્ણાઃ પતન્તિ નૃપતે ત્રયઃ ।
ઉન્નમન્તિ યથા સન્તમાશ્રિત્યેહ સ્વકર્મસુ ॥ ૨૬॥

ન ચાપિ શૂદ્રઃ પતતીતિ નિશ્ચયો
ન ચાપિ સંસ્કારમિહાર્હતીતિ વા ।
શ્રુતિપ્રવૃત્તં ન ચ ધર્મમાપ્નુતે
ન ચાસ્ય ધર્મે પ્રતિષેધનં કૃતમ્ ॥ ૨૭॥

વૈદેહકં શૂદ્રમુદાહરન્તિ
દ્વિજા મહારાજ શ્રુતોપપન્નાઃ ।
અહં હિ પશ્યામિ નરેન્દ્ર દેવં
વિશ્વસ્ય વિષ્ણું જગતઃ પ્રધાનમ્ ॥ ૨૮॥

સતાં વૃત્તમનુષ્ઠાય નિહીના ઉજ્જિહીર્ષવઃ ।
મન્ત્રવર્જં ન દુષ્યન્તિ કુર્વાણાઃ પૌષ્ટિકીઃ ક્રિયાઃ ॥ ૨૯॥

યથા યથા હિ સદ્વૃત્તમાલમ્બન્તીતરે જનાઃ ।
તથા તથા સુખં પ્રાપ્ય પ્રેત્ય ચેહ ચ શેરતે ॥ ૩૦॥

જ

કિં કર્મ દૂસયત્યેનમથ જાતિર્મહામુને ।
સન્દેહો મે સમુત્પન્નસ્તન્મે વ્યાખ્યાતુમર્હસિ ॥ ૩૧॥

પરા

અસંશયં મહારાજ ઉભયં દોષકારકમ્ ।
કર્મ ચૈવ હિ જાતિશ્ચ વિશેષં તુ નિશામય ॥ ૩૨॥

જાત્યા ચ કર્મણા ચૈવ દુષ્ટં કર્મ નિષેવતે ।
જાત્યા દુષ્ટશ્ચ યઃ પાપં ન કરોતિ સ પૂરુષઃ ॥ ૩૩॥

જાત્યા પ્રધાનં પુરુષં કુર્વાણં કર્મ ધિક્કૃતમ્ ।
કર્મ તદ્દૂસયત્યેનં તસ્માત્કર્મ ન શોભનમ્ ॥ ૩૪॥

જ

કાનિ કર્માણિ ધર્મ્યાણિ લોકેઽસ્મિન્દ્વિજસત્તમ ।
ન હિંસન્તીહ ભૂતાનિ ક્રિયમાણાનિ સર્વદા ॥ ૩૫॥

પરા
શ ृणु મેઽત્ર મહારાજ યન્માં ત્વં પરિપૃચ્છસિ ।
યાનિ કર્માણ્યહિંસ્રાણિ નરં ત્રાયન્તિ સર્વદા ॥ ૩૬॥

સંન્યસ્યાગ્નીનુપાસીનાઃ પશ્યન્તિ વિગતજ્વરાઃ ।
નૈઃશ્રેયસં ધર્મપથં સમારુહ્ય યથાક્રમમ્ ॥ ૩૭॥

પ્રશ્રિતા વિનયોપેતા દમનિત્યાઃ સુસંશિતાઃ ।
પ્રયાન્તિ સ્થાનમજરં સર્વકર્મ વિવર્જિતાઃ ॥ ૩૮॥

સર્વે વર્ણા ધર્મકાર્યાણિ સમ્યક્
કૃત્વા રાજન્સત્યવાક્યાનિ ચોક્ત્વા ।
ત્યક્ત્વાધર્મં દારુણં જીવલોકે
યાન્તિ સ્વર્ગં નાત્ર કાર્યો વિચારઃ ॥ ૩૯॥

---

અધ્યાય ૨૮૬
પરાશરોવાચ
પિતા સુખાયો ગુરવઃ સ્ત્રિયશ્ ચ
ન નિર્ગુણા નામ ભવન્તિ લોકે ।
અનન્યભક્તાઃ પ્રિયવાદિનશ્ ચ
હિતાશ્ચ વશ્યાશ્ચ તથૈવ રાજન્ ॥ ૧॥

પિતા પરં દૈવતં માનવાનાં
માતુર્વિશિષ્ટં પિતરં વદન્તિ ।
જ્ઞાનસ્ય લાભં પરમં વદન્તિ
જિતેન્દ્રિયાર્થાઃ પરમાપ્નુવન્તિ ॥ ૨॥

રણાજિરે યત્ર શરાગ્નિસંસ્તરે
નૃપાત્મજો ઘાતમવાપ્ય દહ્યતે ।
પ્રયાતિ લોકાનમરૈઃ સુદુર્લભાન્
નિષેવતે સ્વર્ગફલં યથાસુખમ્ ॥ ૩॥

શ્રાન્તં ભીતં ભ્રષ્ટ શસ્ત્રં રુદન્તં
પરાઙ્મુખં પરિબર્હૈશ્ચ હીનમ્ ।
અનુદ્યતં રોગિણં યાચમાનં
ન વૈ હિંસ્યાદ્બાલવૃદ્ધૌ ચ રાજન્ ॥ ૪॥

પરિબર્હૈઃ સુસમ્પન્નમુદ્યતં તુલ્યતાં ગતમ્ ।
અતિક્રમેત નૃપતિઃ સઙ્ગ્રામે ક્ષત્રિયાત્મજમ્ ॥ ૫॥

તુલ્યાદિહ વધઃ શ્રેયાન્વિશિષ્ટાચ્ચેતિ નિશ્ચયઃ ।
નિહીનાત્કાતરાચ્ચૈવ નૃપાણાં ગર્હિતો વધઃ ॥ ૬॥

પાપાત્પાપસમાચારાન્નિહીનાચ્ચ નરાધિપ ।
પાપ એવ વધઃ પ્રોક્તો નરકાયેતિ નિશ્ચયઃ ॥ ૭॥

ન કશ્ચિત્ત્રાતિ વૈ રાજન્દિષ્ટાન્ત વશમાગતમ્ ।
સાવશેષાયુષં ચાપિ કશ્ચિદેવાપકર્ષતિ ॥ ૮॥

સ્નિગ્ધૈશ્ચ ક્રિયમાણાનિ કર્માણીહ નિવર્તયેત્ ।
હિંસાત્મકાનિ કર્માણિ નાયુરિચ્છેત્પરાયુષા ॥ ૯॥

ગૃહસ્થાનાં તુ સર્વેષાં વિનાશમભિકાઙ્ક્ષિતામ્ ।
નિધનં શોભનં તાત પુલિનેષુ ક્રિયાવતામ્ ॥ ૧૦॥

આયુષિ ક્ષયમાપન્ને પઞ્ચત્વમુપગચ્છતિ ।
નાકારણાત્તદ્ભવતિ કારણૈરુપપાદિતમ્ ॥ ૧૧॥

તથા શરીરં ભવતિ દેહાદ્યેનોપપાદિતમ્ ।
અધ્વાનં ગતકશ્ચાયં પ્રાપ્તશ્ચાયં ગૃહાદ્ગૃહમ્ ॥ ૧૨॥

દ્વિતીયં કારણં તત્ર નાન્યત્કિં ચન વિદ્યતે ।
તદ્દેહં દેહિનાં યુક્તં મોક્ષભૂતેષુ વર્તતે ॥ ૧૩॥

સિરા સ્નાય્વસ્થિ સઙ્ઘાતં બીભત્સા મેધ્ય સઙ્કુલમ્ ।
ભૂતાનામિન્દ્રિયાણાં ચ ગુણાનાં ચ સમાગતમ્ ॥ ૧૪॥

ત્વગન્તં દેહમિત્યાહુર્વિદ્વાંસોઽધ્યાત્મચિન્તકાઃ ।
પુનૈરપિ પરિક્ષીણં શરીરં મર્ત્યતાં ગતમ્ ॥ ૧૫॥

શરીરિણા પરિત્યક્તં નિશ્ચેષ્ટં ગતચેતનમ્ ।
ભૂતૈઃ પ્રકૃતમાપન્નૈસ્તતો ભૂમૌ નિમજ્જતિ ॥ ૧૬॥

ભાવિતં કર્મયોગેન જાયતે તત્ર તત્ર હ ।
ઇદં શરીરં વૈદેહ મ્રિયતે યત્ર તત્ર હ ।
તત્સ્વભાવોઽપરો દૃષ્ટો વિસર્ગઃ કર્મણસ્તથા ॥ ૧૭॥

ન જાયતે તુ નૃપતે કં ચિત્કાલમયં પુનઃ ।
પરિભ્રમતિ ભૂતાત્મા દ્યામિવામ્બુધરો મહાન્ ॥ ૧૮॥

સ પુનર્જાયતે રાજન્પ્રાપ્યેહાયતનં નૃપ ।
મનસઃ પરમો હ્યાત્મા ઇન્દ્રિયેભ્યઃ પરં મનઃ ॥ ૧૯॥

દ્વિવિધાનાં ચ ભૂતાનાં જઙ્ગમાઃ પરમા નૃપ ।
જઙ્ગમાનામપિ તથા દ્વિપદાઃ પરમા મતાઃ ।
દ્વિપદાનામપિ તથા દ્વિજા વૈ પરમાઃ સ્મૃતાઃ ॥ ૨૦॥

દ્વિજાનામપિ રાજેન્દ્ર પ્રજ્ઞાવન્તઃ પરા મતાઃ ।
પ્રાજ્ઞાનામાત્મસમ્બુદ્ધાઃ સમ્બુદ્ધાનામમાનિનઃ ॥ ૨૧॥

જાતમન્વેતિ મરણં નૃણામિતિ વિનિશ્ચયઃ ।
અન્તવન્તિ હિ કર્માણિ સેવન્તે ગુણતઃ પ્રજાઃ ॥ ૨૨॥

આપન્ને તૂત્તરાં કાષ્ઠાં સૂર્યે યો નિધનં વ્રજેત્ ।
નક્ષત્રે ચ મુહૂર્તે ચ પુણ્યે રાજન્સ પુણ્યકૃત્ ॥ ૨૩॥

અયોજયિત્વા ક્લેશેન જનં પ્લાવ્ય ચ દુષ્કૃતમ્ ।
મૃત્યુનાપ્રાકૃતેનેહ કર્મકૃત્વાત્મશક્તિતઃ ॥ ૨૪॥

વિષમુદ્બન્ધનં દાહો દસ્યુ હસ્તાત્તથા વધઃ ।
દંસ્ત્રિભ્યશ્ચ પશુભ્યશ્ચ પ્રાકૃતો વધ ઉચ્યતે ॥ ૨૫॥

ન ચૈભિઃ પુણ્યકર્માણો યુજ્યન્તે નાભિસન્ધિજૈઃ ।
એવંવિધૈશ્ચ બહુભિરપરૈઃ પ્રાકૃતૈરપિ ॥ ૨૬॥

ઊર્ધ્વં હિત્વા પ્રતિષ્ઠન્તે પ્રાનાઃ પુણ્યકૃતાં નૃપ ।
મધ્યતો મધ્યપુણ્યાનામધો દુષ્કૃત કર્મણામ્ ॥ ૨૭॥

એકઃ શત્રુર્ન દ્વિતીયોઽસ્તિ શત્રુર્
અજ્ઞાનતુલ્યઃ પુરુષસ્ય રાજન્ ।
યેનાવૃતઃ કુરુતે સમ્પ્રયુક્તો
ઘોરાણિ કર્માણિ સુદારુણાનિ ॥ ૨૮॥

પ્રબોધનાર્થં શ્રુતિધર્મયુક્તં
વૃદ્ધાનુપાસ્યં ચ ભવેત યસ્ય ।
પ્રયત્નસાધ્યો હિ સ રાજપુત્ર

પ્રજ્ઞાશરેણોન્મથિતઃ પરૈતિ ॥ ૨૯॥

અધીત્ય વેદાંસ્તપસા બ્રહ્મચારી
યજ્ઞાઞ્શક્ત્યા સંનિસૃજ્યેહ પઞ્ચ ।
વનં ગચ્છેત્પુરુષો ધર્મકામઃ
શ્રેયશ્ચિત્વા સ્થાપયિત્વા સ્વવંશમ્ ॥ ૩૦॥

ઉપભોગૈરપિ ત્યક્તં નાત્માનમવસાદયેત્ ।
ચન્દાલત્વેઽપિ માનુષ્યં સર્વથા તાત દુર્લભમ્ ॥ ૩૧॥

ઇયં હિ યોનિઃ પ્રથમા યાં પ્રાપ્ય જગતીપતે ।
આત્મા વૈ શક્યતે ત્રાતું કર્મભિઃ શુભલક્ષણૈઃ ॥ ૩૨॥

કથં ન વિપ્રનશ્યેમ યોનીતોઽસ્યા ઇતિ પ્રભો ।
કુર્વન્તિ ધર્મં મનુજાઃ શ્રુતિપ્રામાન્ય દર્શનાત્ ॥ ૩૩॥

યો દુર્લભતરં પ્રાપ્ય માનુષ્યમિહ વૈ નરઃ ।
ધર્માવમન્તા કામાત્મા ભવેત્સ ખલુ વઞ્ચ્યતે ॥ ૩૪॥

યસ્તુ પ્રીતિપુરોગેણ ચક્ષુષા તાત પશ્યતિ ।
દીપોપમાનિ ભૂતાનિ યાવદર્ચિર્ન નશ્યતિ ॥ ૩૫॥

સાન્ત્વેનાનુપ્રદાનેન પ્રિયવાદેન ચાપ્યુત ।
સમદુઃખસુખો ભૂત્વા સ પરત્ર મહીયતે ॥ ૩૬॥

દાનં ત્યાગઃ શોભના મૂર્તિરદ્ભ્યો
ભૂયઃ પ્લાવ્યં તપસા વૈ શરીરમ્ ।
સરસ્વતી નૈમિષપુષ્કરેષુ
યે ચાપ્યન્યે પુણ્યદેશાઃ પૃથિવ્યામ્ ॥ ૩૭॥

ગૃહેષુ યેષામસવઃ પતન્તિ
તેષામથો નિર્હરનં પ્રશસ્તમ્ ।
યાનેન વૈ પ્રાપનં ચ શ્મશાને
શૌચેન નૂનં વિધિના ચૈવ દાહઃ ॥ ૩૮॥

ઇષ્ટિઃ પુષ્ટિર્યજનં યાજનં ચ
દાનં પુણ્યાનાં કર્મણાં ચ પ્રયોગઃ ।
શક્ત્યા પિત્ર્યં યચ્ચ કિં ચિત્પ્રશસ્તં
સર્વાણ્યાત્માર્થે માનવો યઃ કરોતિ ॥ ૩૯॥

ધર્મશાસ્ત્રાણિ વેદાશ્ચ ષડઙ્ગાનિ નરાધિપ ।
શ્રેયસોઽર્થે વિધીયન્તે નરસ્યાક્લિષ્ટ કર્મણઃ ॥ ૪૦॥

ભીષ્મોવાચ
એવદ્વૈ સર્વમાખ્યાતં મુનિના સુમહાત્મના ।
વિદેહરાજાય પુરા શ્રેયસોઽર્થે નરાધિપ ॥ ૪૧॥

---

અધ્યાય ૨૮૭
ભીષ્મોવાચ
પુનરેવ તુ પપ્રચ્છ જનકો મિથિલાધિપઃ ।
પરાશરં મહાત્માનં ધર્મે પરમનિશ્ચયમ્ ॥ ૧॥

કિં શ્રેયઃ કા ગતિર્બ્રહ્મન્કિં કૃતં ન વિનશ્યતિ ।
ક્વ ગતો ન નિવર્તેત તન્મે બ્રૂહિ મહામુને ॥ ૨॥

પરાશરોવાચ
અસઙ્ગઃ શ્રેયસો મૂલં જ્ઞાનં જ્ઞાનગતિઃ પરા ।
ચીર્ણં તપો ન પ્રનશ્યેદ્વાપઃ ક્ષેત્રે ન નશ્યતિ ॥ ૩॥

છિત્ત્વાધર્મમયં પાશં યદા ધર્મેઽભિરજ્યતે ।
દત્ત્વાભય કૃતં દાનં તદા સિદ્ધિમવાપ્નુયાત્ ॥ ૪॥

યો દદાતિ સહસ્રાણિ ગવામશ્વશતાનિ ચ ।
અભયં સર્વભૂતેભ્યસ્તદ્દાનમતિવર્તતે ॥ ૫॥

વસન્વિષયમધ્યેઽપિ ન વસત્યેવ બુદ્ધિમાન્ ।
સંવસત્યેવ દુર્બુદ્ધિરસત્સુ વિષયેષ્વપિ ॥ ૬॥

નાધર્મઃ શ્લિષ્યતે પ્રાજ્ઞમાપઃ પુષ્કર પર્ણવત્ ।
અપ્રાજ્ઞમધિકં પાપં શ્લિષ્યતે જતુ કાષ્ઠવત્ ॥ ૭॥

નાધર્મઃ કારણાપેક્ષી કર્તારમભિમુઞ્ચતિ ।
કર્તા ખલુ યથાકાલં તત્સર્વમભિપદ્યતે ।
ન ભીદ્યન્તે કૃતાત્માન આત્મપ્રત્યય દર્શિનઃ ॥ ૮॥

બુદ્ધિકર્મેન્દ્રિયાણાં હિ પ્રમત્તો યો ન બુધ્યતે ।
શુભાશુભેષુ સક્તાત્મા પ્રાપ્નોતિ સુમહદ્ભયમ્ ॥ ૯॥

વીતરાગો જિતક્રોધઃ સમ્યગ્ભવતિ યઃ સદા ।
વિષયે વર્તમાનોઽપિ ન સ પાપેન યુજ્યતે ॥ ૧૦॥

મર્યાદાયાં ધર્મસેતુર્નિબદ્ધો નૈવ સીદતિ ।
પુષ્ટસ્રોત ઇવાયત્તઃ સ્ફીતો ભવતિ સઞ્ચયઃ ॥ ૧૧॥

યથા ભાનુગતં તેજો મનિઃ શુદ્ધઃ સમાધિના ।
આદત્તે રાજશાર્દૂલ તથા યોગઃ પ્રવર્તતે ॥ ૧૨॥

યથા તિલાનામિહ પુષ્પસંશ્રયાત્
પૃથક્પૃથગ્યાનિ ગુણોઽતિસૌમ્યતામ્ ।
તથા નરાણાં ભુવિ ભાવિતાત્મનાં
યથાશ્રયં સત્ત્વગુણઃ પ્રવર્તતે ॥ ૧૩॥

જહાતિ દારાનિહતે ન સમ્પદઃ
સદશ્વયાનં વિવિધાશ્ચ યાઃ ક્રિયાઃ ।
ત્રિવિષ્ટપે જાતમતિર્યદા નરસ્
તદાસ્ય બુદ્ધિર્વિષયેષુ ભીદ્યતે ॥ ૧૪॥

પ્રસક્તબુદ્ધિર્વિષયેષુ યો નરો
યો બુધ્યતે હ્યાત્મહિતં કદા ચન ।
સ સર્વભાવાનુગતેન ચેતસા
નૃપામિષેણેવ ઝષો વિકૃષ્યતે ॥ ૧૫॥

સઙ્ઘાતવાન્મર્ત્યલોકઃ પરસ્પરમપાશ્રિતઃ ।
કદલી ગર્ભનિઃસારો નૌરિવાપ્સુ નિમજ્જતિ ॥ ૧૬॥

ન ધર્મકાલઃ પુરુષસ્ય નિશ્ચિતો
નાપિ મૃત્યુઃ પુરુષં પ્રતીક્ષતે ।
ક્રિયા હિ ધર્મસ્ય સદૈવ શોભના
યદા નરો મૃત્યુમુખેઽભિવર્તતે ॥ ૧૭॥

યથાન્ધઃ સ્વગૃહે યુક્તો હ્યભ્યાસાદેવ ગચ્છતિ ।
તથાયુક્તેન મનસા પ્રાજ્ઞો ગચ્છતિ તાં ગતિમ્ ॥ ૧૮॥

મરણં જન્મનિ પ્રોક્તં જન્મ વૈ મરણાશ્રિતમ્ ।
અવિદ્વાન્મોક્ષધર્મેષુ બદ્ધોભ્રમતિ ચક્રવત્ ॥ ૧૯॥

યથા મૃણાલોઽનુગતમાશુ મુઞ્ચતિ કર્દમમ્ ।
તથાત્મા પુરુષસ્યેહ મનસા પરિમુચ્યતે ।
મનઃ પ્રનયતેઽઽત્માનં સ એનમભિયુઞ્જતિ ॥ ૨૦॥

પરાર્થે વર્તમાનસ્તુ સ્વકાર્યં યોઽભિમન્યતે ।
ઇન્દ્રિયાર્થેષુ સક્તઃ સન્સ્વકાર્યાત્પરિહીયતે ॥ ૨૧॥

અધસ્તિર્યગ્ગતિં ચૈવ સ્વર્ગે ચૈવ પરાં ગતિમ્ ।
પ્રાપ્નોતિ સ્વકૃતૈરાત્મા પ્રાજ્ઞસ્યેહેતરસ્ય ચ ॥ ૨૨॥

મૃન્મયે ભાજને પક્વે યથા વૈ ન્યસ્યતે દ્રવઃ ।
તથા શરીરં તપસા તપ્તં વિષયમશ્નુતે ॥ ૨૩॥

વિષયાનશ્નુતે યસ્તુ ન સ ભોક્ષ્યત્યસંશયમ્ ।
યસ્તુ ભોગાંસ્ત્યજેદાત્મા સ વૈ ભોક્તું વ્યવસ્યતિ ॥ ૨૪॥

નીહારેણ હિ સંવીતઃ શિશ્નોદર પરાયનઃ ।
જાત્યન્ધ ઇવ પન્થાનમાવૃતાત્મા ન બુધ્યતે ॥ ૨૫॥

વણિગ્યથા સમુદ્રાદ્વૈ યથાર્થં લભતે ધનમ્ ।
તથા મર્ત્યાર્ણવે જન્તોઃ કર્મ વિજ્ઞાનતો ગતિઃ ॥ ૨૬॥

અહોરાત્ર મયે લોકે જરા રૂપેણ સઞ્ચરન્ ।
મૃત્યુર્ગ્રસતિ ભૂતાનિ પવનં પન્નગો યથા ॥ ૨૭॥

સ્વયં કૃતાનિ કર્માણિ જાતો જન્તુઃ પ્રપદ્યતે ।
નાકૃતં લભતે કશ્ચિત્કિં ચિદત્ર પ્રિયાપ્રિયમ્ ॥ ૨૮॥

શયાનં યાન્તમાસીનં પ્રવૃત્તં વિષયેષુ ચ ।
શુભાશુભાનિ કર્માણિ પ્રપદ્યન્તે નરં સદા ॥ ૨૯॥

ન હ્યન્યત્તીરમાસાદ્ય પુનસ્તર્તું વ્યવસ્યતિ ।
દુર્લભો દૃશ્યતે હ્યસ્ય વિનિપાતો મહાર્ણવે ॥ ૩૦॥

યથા ભારાવસક્તા હિ નૌર્મહામ્ભસિ તન્તુના ।
તથા મનોઽભિયોગાદ્વૈ શરીરં પ્રતિકર્ષતિ ॥ ૩૧॥

યથા સમુદ્રમભિતઃ સંસ્યૂતાઃ સરિતોઽપરાઃ ।
તથાદ્યા પ્રકૃતિર્યોગાદભિસંસ્યૂયતે સદા ॥ ૩૨॥

સ્નેહપાશૈર્બહુવિધૈરાસક્તમનસો નરાઃ ।

પ્રકૃતિષ્ઠા વિષીદન્તિ જલે સૈકત વેશ્મવત્ ॥ ૩૩॥

શરીરગૃહ સંસ્થસ્ય શૌચતીર્થસ્ય દેહિનઃ ।
બુદ્ધિમાર્ગ પ્રયાતસ્ય સુખં ત્વિહ પરત્ર ચ ॥ ૩૪॥

વિસ્તરાઃ ક્લેશસંયુક્તાઃ સઙ્ક્ષેપાસ્તુ સુખાવહાઃ ।
પરાર્થં વિસ્તરાઃ સર્વે ત્યાગમાત્મહિતં વિદુઃ ॥ ૩૫॥

સઙ્કલ્પજો મિત્રવર્ગો જ્ઞાતયઃ કારણાત્મકાઃ ।
ભાર્યા દાસાશ્ચ પુત્રાશ્ચ સ્વમર્થમનુયુઞ્જતે ॥ ૩૬॥

ન માતા ન પિતા કિં ચિત્કસ્ય ચિત્પ્રતિપદ્યતે ।
દાનપથ્યોદનો જન્તુઃ સ્વકર્મફલમશ્નુતે ॥ ૩૭॥

માતાપુત્રઃ પિતા ભ્રાતા ભાર્યા મિત્ર જનસ્તથા ।
અષ્ટાપદ પદસ્થાને ત્વક્ષમુદ્રેવ ન્યસ્યતે ॥ ૩૮॥

સર્વાણિ કર્માણિ પુરા કૃતાનિ
શુભાશુભાન્યાત્મનો યાન્તિ જન્તોર્ ।
ઉપસ્થિતં કર્મફલં વિદિત્વા
બુદ્ધિં તથા ચોદયતેઽન્તરાત્મા ॥ ૩૯॥

વ્યવસાયં સમાશ્રિત્ય સહાયાન્યોઽધિગચ્છતિ ।
ન તસ્ય કશ્ચિદારમ્ભઃ કદા ચિદવસીદતિ ॥ ૪૦॥

અદ્વૈધ મનસં યુક્તં શૂરં ધીરં વિપશ્ચિતમ્ ।
ન શ્રીઃ સન્ત્યજતે નિત્યમાદિત્યમિવ રશ્મયઃ ॥ ૪૧॥

આસ્તિક્ય વ્યવસાયાભ્યામુપાયાદ્વિસ્મયાદ્ધિયા ।
યમારભત્યનિન્દ્યાત્મા ન સોઽર્થઃ પરિષીદતિ ॥ ૪૨॥

સર્વૈઃ સ્વાનિ શુભાશુભાનિ નિયતં કર્માણિ જન્તુઃ સ્વયં
ગર્ભાત્સમ્પ્રતિપદ્યતે તદુભયં યત્તેન પૂર્વં કૃતમ્ ।
મૃત્યુશ્ચાપરિહારવાન્સમગતિઃ કાલેન વિચ્છેદિતા
દારોશ્ચૂર્ણમિવાશ્મસારવિહિતં કર્માન્તિકં પ્રાપયેત્ ॥ ૪૩॥

સ્વરૂપતામાત્મકૃતં ચ વિસ્તરં
કુલાન્વયં દ્રવ્યસમૃદ્ધિ સઞ્ચયમ્ ।
નરો હિ સર્વો લભતે યથાકૃતં

શુભશુભેનાત્મ કૃતેન કર્મણા ॥ ૪૪॥

ભીષ્મોવાચ
ઇત્યુક્તો જનકો રાજન્યથાતથ્યં મનીસિના ।
શ્રુત્વા ધર્મવિદાં શ્રેષ્ઠઃ પરાં મુદમવાપ હ ॥ ૪૫॥

॥ ઇતિ પરાશરગીતા સમાપ્તા ॥

Adhyaya numbers 279-287 in shAntiparva, Mahabharata critical edition
(Bhandarkar Oriental Research Institute BORI).
In Kinjavadekar's edition they are 290-298.

Sunder Hattangadi

---

*parAsharagItA*
pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*